# Skandaproktam Shivaparvapujakathanam

# સ્કન્દપ્રોક્તં શિવપર્વપૂજાકથનમ્

## Document Information

Text title : Skandaproktam Shivaparvapujakathanam

File name : skandaproktaMshivaparvapUjAkathanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 42 skandaproktaM shivaparvapUjAkathanam | vAvRittashlokAH ||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 3, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં શિવપર્વપૂજાકથનમ્

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)

સ્કન્દ ઉવાચ ।

યે સ્મરન્તિ સદાકાલમીશાનં પૂજયન્તિ વા ।
રુદ્રલોકાત્પરિભ્રષ્ટા વિજ્ઞેયાસ્તે ગણેશ્વરાઃ ॥ ૧॥

અગ્નિહોત્રાશ્ચ વેદાશ્ચ યજ્ઞાશ્ચ બહુદક્ષિણાઃ ।
શિવલિઙ્ગાર્ચનસ્યૈવ કોટ્યંશેનાપિ નો સમાઃ ॥ ૨॥

સદા યજતિ યજ્ઞેન સદા દાનં પ્રયચ્છતિ ।
સદા સ વાયુભક્ષઃ સ્યાત્ સદા યોગં ચરેદપિ ॥ ૩॥

યઃ શિવં પૂજયેન્નિત્યં પ્રણમેદ્વાપિ ભક્તિતઃ ।
તસ્ય યોગં ચ મોક્ષં ચ શિવઃ પ્રીતઃ પ્રયચ્છતિ ॥ ૪॥

યઃ કુર્યાદર્ચનં માસમેકાહારો જિતેન્દ્રિયઃ ।
સ યત્ફલમવાપ્નોતિ ન તત્સર્વૈર્મહામખૈઃ ॥ ૫॥

પૌર્ણમાસ્યામાવાસ્યાં ચતુર્દશ્યષ્ટમીષુ ચ ।
(પૂર્ણિમાયામમાયાં ચ ચતુર્દશ્યષ્ટમીષુ ચ ।)
સ્નાપયિત્વામ્ભસા નિત્યં સર્વયજ્ઞફલં લભેત્ ॥ ૬॥

કૃષ્ણપક્ષે ત્રયોદશ્યામુપોષ્ય પરમેશ્વમ્ ।
પ્રાતર્મધ્યાહ્નયોઃ પૂજાં ચતુર્દશ્યાં સમારભેત્ ॥ ૭॥

કૃષ્ણાષ્ટમ્યામુપોષ્યાથ શઙ્કરં યોઽર્ચયેત્તુ સઃ ।
પ્રાપ્નોતિ પરમં સ્થાનં યત્ર દેવો મહેશ્વરઃ ॥ ૯॥

દાનોપવાસનિયમૈઃ પૂજાજાગરભોજનૈઃ ।
મહાસ્નાનાદિવિધિના શિવં પર્વસુ પૂજયેત્ ॥ ૧૧॥

યાવચ્ચ સર્વકાલેષુ યાવદર્ચયતે શિવમ્ ।

તાવત્કાલાર્ચનં પુણ્યં તાવત્કાલાર્ચનાલ્લભેત્ ॥ ૧૨॥

સ્નાત્વા પર્વસુ યત્નેન યથાવિભવવિસ્તરૈઃ ।
પૂજનીયઃ શિવો નિત્યં મહાપુણ્યજિગીષયા ॥ ૧૩॥

નૈરન્તર્યેણ ષણ્માસાન્ વિધિના પૂજ્ય શઙ્કરમ્ ।
પુણ્યં તદેવ લભતે ત્રિકાલં વિષુવાર્ચનાત્ ॥ ૧૪॥

એવમેવ ફલં જ્ઞેયં ગ્રહણાયનયોરપિ ।
સઙ્ક્રાન્તૌ ચ દિને છિદ્રે ષડશીતિમુખેષુ ચ ॥ ૧૫॥

માસૈશ્ચતુર્ભિર્યત્પુણ્યં વિધિના પૂજ્ય શઙ્કરમ્ ।
તત્કાર્તિક્યા ભવેત્પુણ્યં પૌર્મમાસ્યાં શિવાર્ચનાત્ ॥ ૧૬॥

પુણ્યં તદેતત્ફાલ્ગુન્યામમાયામેવમેવ ચ ।
ચાતુર્માસ્યાર્ચનાદેતન્મહત્પુણ્યફલં ભવેત્ ॥ ૧૭॥

માઘમાસે સમુદ્દિશ્ય ત્રિસન્ધ્યમર્ચયેચ્છિવમ્ ।
લભેત્ ષાણ્માસિકં પુણ્યં માસેનૈવ ન સંશયઃ ॥ ૧૮॥

યથા માઘે તથાસ્સ્ષાઢે માસે ચૈવ તુ કાર્તિકે ।
ત્રિષુ પુણ્યં સમં જ્ઞેયં માસેષ્વેતેષુ યત્કૃતમ્ ॥ ૧૯॥

ચાતુર્દશ્યામમાયાં ચ પૌર્ણમાસ્યાં ચ પાક્ષિકમ્ ।
પુણ્યમષ્ટગુણં જ્ઞેયમષ્ટમ્યામર્ચયેચ્છિવમ્ ॥ ૨૦॥

યઃ પ્રદદ્યાદ્ગવાં લક્ષં દોગ્ધ્રીણાં વેદપારગે ।
એકાહં યોઽર્ચલ્લિઙ્ગઙ્ગં તસ્ય પુણ્યં તતોઽધિકમ્ ॥ ૨૧॥

માસે માસે તુ યોઽશ્નીયાદ્યાવજ્જીવં સકૃન્નરઃ ।
યશ્ચાર્ચયેત્સકૃલ્લિઙ્ગં સમમેવ ન સંશયઃ ॥ ૨૨॥

એતેન ક્રમયોગેન પુણ્યવૃદ્ધિર્દિને દિને ।
યઃ પુનઃ સઙ્ગમુત્સૃજ્ય ઇદમબ્દં પ્રપૂજયેત્ ॥ ૨૩॥

નૈરન્તર્યાચ્છતગુણં તસ્ય પુણ્યવિવૃદ્ધયે ।
પઞ્ચાશદ્ગુણિતં પુણ્યમબ્દોર્ધ્વં યોઽર્ચયેચ્છિવમ્ ॥ ૨૪॥

ઋતાવૃતૌ તદર્ધં સ્યાન્માસે માસે તદર્ધકમ્ ।
માસાર્ધમપિ યો લિઙ્ગં નૈરન્તર્યેણ પૂજયેત્ ॥ ૨૫॥

પુરુષોત્તમઃ શિવો જ્ઞેયો નૈરન્તર્યં હિ દુષ્કરમ્ ।
પ્રાતરુત્થાય યો લિઙ્ગં સકૃદ્ભક્ત્યા પ્રપૂજયેત્ ॥ ૨૬॥

કપિલાનાં શતં દત્વા યત્પુણ્યં તદવાપ્નુયાત્ ।
મધ્યં દિનકરે પ્રાપ્તે યો લિઙ્ગં પૂજયેન્નરઃ ॥ ૨૭॥

સમ્પૂર્ણાં પૃથિવીં દત્વા યત્પુણ્યં તદવાપ્નુયાત્ ।
વારુણીમાશ્રિતે સૂર્યે યઃ શિવં સમ્પ્રપૂજયેત્ ॥ ૨૮॥

ગવાં શતસહસ્રસ્ય દત્તસ્ય ફલમાપ્નુયાત્ ।
યો લિઙ્ગમર્ધરાત્રે તુ શુચિર્ભૂત્વા પ્રપૂજયેત્ ॥ ૨૯॥

અગ્નિષ્ટોમસહસ્રસ્ય ધર્મસ્ય લભતે ફલમ્ ।
એવં વેલાસુ સર્વાસુ અવેલાસ્વાપિ શઙ્કરમ્ ॥ ૩૦॥

સમ્પૂજયેન્નરો ભક્ત્યા સર્વાન્ કામાનવાપ્નુયાત્ ।
શિવલિઙ્ગં મહાપુણ્યં સર્વદેવનમસ્કૃતમ્ ॥ ૩૧॥

યઃ સ્પૃશેદપિ પાણિભ્યાં ન સ પાપૈઃ પ્રલિપ્યતે ।
ન તે ભૂયઃ પ્રયાસ્યન્તિ યોનિમાર્ગં સુકણ્ટકમ્ ॥ ૩૨॥

ક્રમાન્મોક્ષં ગમિષ્યન્તિ યે નરા લિઙ્ગમાશ્રિતાઃ ।
કાઞ્ચનં મેરુમાત્રં ચ સર્વાં દત્વા વસુન્ધરામ્ ॥ ૩૩॥

સાગરાન્ વસ્તુપૂર્ણાંશ્ચ ન લિઙ્ગાર્ચયિતુઃ સમમ્ ।
મેરુમન્દરતુલ્યોઽપિ રાશિઃ પાપસ્ય કર્મણઃ ॥ ૩૪॥

ઈશ્વરં વૈદ્યમાસાદ્ય નશ્યતે દુષ્ટરોગવત્ ।
શિવાર્ચનરતો નિત્યં મહાપાતકસંયુતૈઃ ॥ ૩૫॥

દોષૈઃ કૃતૈર્ન લિપ્યેત પદ્મપત્રમિવામ્ભસા ।
છિત્વા છિત્વા ચ ભૂતાનિ હત્વા સર્વમિદં જગત્ ॥ ૩૬॥

યજેદેકં વિરૂપાક્ષં ન સ પાપૈઃ પ્રલિપ્યતે ।
સર્વાવસ્થાં ગતો વાપિ યુક્તો વા સર્વપાતકૈઃ ॥ ૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શિવપર્વપૂજાકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । અધ્યાયઃ ૪૨ સ્કન્દપ્રોક્તં શિવપર્વપૂજાકથનમ્ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 42 skandaproktaM shivaparvapUjAkathanam . vAvRRittashlokAH ..

Notes:

Skanda સ્કન્દ outlines about the Parva પર્વ during which ŚivaPūjā શિવપૂજા is especially conducted; viz., Pūrṇimā પૂર્ણિમા, Amāvasyā અમાવસ્યા, Caturdaśī ચતુર્દશી, Aṣṭamī અષ્ટમી (especially Kṛṣṇāṣṭamī કૃષ્ણાષ્ટમી), Kṛṣṇa Trayodaśī કૃષ્ણ ત્રયોદશી, Kṛṣṇa Caturdaśī કૃષ્ણ ચતુર્દશી. He also mentions about merits of worshiping Śiva શિવ during Grahaṇa ગ્રહણ, Ayana અયન, various Saṅkrānti-s સઙ્ક્રાન્તિ including Ṣaḍaśītimukha ષડશીતિમુખ, Cāturmāsa ચાતુર્માસ; the three months of Māgha માઘ, Āṣāḍha આષાઢ and Kārtika કાર્તિક; during change of Ṛtu ઋતુ etc.

Proofread by Ruma Dewan

---

*Skandaproktam Shivaparvapujakathanam*

pdf was typeset on November 3, 2024

Please send corrections to *sanskrit@cheerful.com*